उपशास्त्री-II खण्ड  साहित्यम् · तृतीय-पत्रम्

रघुवंशमहाकाव्यम्
द्वितीयः सर्गः

स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ।।

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके महर्षि वसिष्ठः राजा दिलीपं प्रति कथयति - प्रशंसनीयस्वभावः सत्सु वत्सलप्रेमवान् वत्सलः सज्जनप्रियश्च राजा दिलीपः गुरोराज्ञया वत्सपानहोमादि कार्ययोरनन्तरम वशिष्ठ नन्दिनीदुग्धं समुज्ज्वलं साकारं यश इव अतिप्रेम्णा पीतवान् ।

व्याख्या - अनिन्दितात्मा = अगर्हितस्वभावः, सद्वत्सल = सज्जनानुरागवान्, वसिष्ठेन = गुरुणा, कृताभ्यनुज्ञः = दत्तानुमितः, सः = राजा दिलीपः, वत्सहुतावशेषं = वत्सपानयज्ञाहुत्यवशिष्टम्, नन्दिनीस्तन्यं = नन्दिनीपयः, मूर्तं = मूर्तिमत्, शुभ्रं = शुक्लम्, यश इव = कीर्तिमिव, अतितृष्णः = उत्कण्ठितः सन्, पपौ = पीतवान् ।

Renu Devi
12/12/20
रा० उ० सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री-Iखण्ड    साहित्यम्

सप्तमोऽङ्कः अभिज्ञानशाकुन्तलम्

सुतनु! हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत्।
प्रबलतमसामेवंप्रायाः शुभेषु प्रवृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया॥

उत्तरम्- प्रसंगः - प्रस्तुतोऽयं श्लोक महाकवि कालिदास विरचितः अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके शकुन्तलाहृदयात् निराकरणदुःखं दूरीकर्तुं प्रयतमानो नृपो दुष्यन्तः तां प्रियां शकुन्तलामनुनयन्नाह -

व्याख्या:- हे शशाङ्कतिलके प्रिये! प्राक् सत्कृतनिराकृतिदुःखं स्वहृदयात् निष्कासनीयम्, यतो मया जानता तन्न कृतम्। तदानीं काले मम हृदये (सुलभकोपात् महर्षे दुर्वाससः शापात्) प्रबलः सम्मोह आसीत्। इदानीमङ्गुलीयकदर्शनेन सो व्यपगतः। यथा नेत्रहीनः पुमान् केनापि पुंसा निजगले निहितां सुरभिपुष्पमालामपि सर्पस्याशङ्कया स्वकीयाद् गलान्निस्सार्य दूरमुत्क्षिपति तथैव पूर्वं ते प्रत्याख्यान काले स्मृतिहीनेन मया स्वयमुपस्थितापि त्वं प्रत्याख्याता। अतो मया महद्दुःखमनुभूतमत्यन्तं क्लेशिता च भवती। तदेतत्सर्वमजानता कृतं मत्वा क्षम्यतामिति तात्पर्यम्। अत्राप्रस्तुत-प्रशंसा-भ्रान्तिमद्-काव्यलिंग-दृष्टान्तालंकाराः हरिणीवृत्तं च।

Renu Devi
12/12/20
राधा उमाकान्त सं० महाविद्यालय सुखसेना, पूर्णिया।

शास्त्री - II खण्ड साहित्यम्

रघुवंश महाकाव्यम्-चतुर्दशः सर्गः

① प्र० → स मौलरक्षोहरिभिः ससैन्यस्तूर्यस्वनानन्दितपौरवर्गः ।
विवेश सौधोद्गतलाजवर्षामुत्तोरणामन्वयराजधानीम् ॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति ।

व्याख्या → अस्मिन् श्लोके साकेतोपवने तस्मिन्, अभिषेकः श्रीरामः वृद्धमन्त्रिभिः सपरिजनविभीषण-सुग्रीवादिभिश्च सार्धं तूर्यादिवाद्यैरयोध्यावासिनो नागरिकान् नन्दयन् उत्सवदर्शनीयां रघुवंशराजधानीम् अयोध्यानगरीं प्रविवेश। तदानीं शोभायात्रावसरेऽयोध्यका नागरिकाः महता हर्षोल्लासेन सुधालिप्ताट्टालिकागवाक्षेभ्यः श्रीरामोपरि लाजावृष्टीः प्रसूनप्रक्षेपं चाकार्षुः तथा तत्सम्मानप्रदर्शनार्थं स्व-स्वभवनसमीपे कदलीस्तम्भाम्र-पल्लवतोरणादिसज्जावितानं प्रदर्शयामासुरिति भावः।

Renu Devi
12/12/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

उपशास्त्री-प्रथम खण्ड साहित्यम - तृतीयः पत्रम्

रघुवंश महाकाव्यम्

द्वितीयः सर्गः

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥

उत्तरम्-प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।

व्याख्या:- भूपतिः = पृथ्वीपतिः राजा दिलीपः, तां = नन्दिनीम्, स्थितां = अवस्थितां सतीम्, स्थितः = तिष्ठन् सन् प्रयातां = प्रचलिताम्, उच्चलितः = प्रचलन् गच्छन् सन्, निषेदुषीं = उपविष्टाम्, आसनबन्धधीरः = स्थिरतयोपविष्टः सन्, जलं = पानीयम्, आददानां = पिबन्तीम्, जलाभिलाषी = जलं पिबन् सन् (तां वसिष्ठ धेनुम्), छाया = प्रतिबिम्बम्, इव = यथा, अन्वगच्छत् = अनुजगाम्

भावार्थ = राजा दिलीप उस नन्दिनी के ठहरने पर ठहरते हुए, चलने पर चलते हुए, बैठने पर बैठते हुए, पानी पीने पर पानी पीते हुए छाया के समान उसके पीछे-पीछे चले

Renu Devi
12/12/20

रा०उ० सं० महावि० सुरवसेना, पूर्णिया।